Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 2 | ISSN : 2581- 6306

# ज्योतिषनये बीजवपनविमर्श:

**डॉ. रामदास शर्मा**
सहायकाचार्य:, ज्योतिषविभाग:, केन्द्रीयसंस्कृतविश्वविद्यालय:, श्रीरणवीरपरिसर:, जम्मू।

**शोधसार: –** बीजवपनस्य विहितकाल: पराशरेम प्रोक्तं यत् बीजवपनस्य कृते वैशाखमासं सर्वोत्कृष्टं वर्तते तथा ज्येष्ठमासं मध्यमं विजानीयात् बीजवपनाय उत्तरात्रयं-मूल-ज्येष्ठा-अनुराधा-मघा-मृगशिरा-रोहिणी-हस्त-रेवती-विशाखानक्षत्राणि शुभानि कथितानि तथा च श्रवण-पूर्वाफाल्गुनि-पूर्वाषाढ-पूर्वाभाद्रपद-विशाखा-भरणी-आर्द्रा-स्वाती- अश्लेषा नक्षत्राणि अशुभानि कथितानि। बीजवपने शनिभौमवारयो: अशुभ: कथिता: तथा च रिक्ततिथिषु अपि अशुभ: कथिता।

**मुख्यशब्दा:** -बीजवपन: बीज: ज्योतिष: पराशर: नक्षत्राणि सृष्टि: कृषि:।

सृष्टे: आरम्भात् अद्य यावद् बीजवपनस्य महत्त्वं दरीदृश्यते। बीजवपनेन विना सृष्टे: कल्पना नैव कर्तुं शक्यते। अत: तथैव बीजवपनेन विना कृषे: कल्पना वन्ध्या पुत्रेव भवति। अत: आचार्येण पराशरेण बीजं द्विविधं विभक्तमस्ति - बीजवपनं रोपणञ्च। यथा -

**वपनं रोपणं चैव बीजं स्यादुभयात्मकम्।**

**वपनं रोगनिर्मुक्तं रोपणं सगदं सदा।।**

आचार्येण पराशरेण वपनकालस्य मासा: कथिता: ते यथा -

**वैशाखे वपनं श्रेष्ठं ज्यैष्ठे तु मध्यमं स्मृतम्।**

**आषाढे चाधमं प्रोक्तं श्रावणे चाधमामम्।।**[1]

अर्थात् वैशाखमासे वपनं श्रेष्ठम् अस्ति। ज्येष्ठे वपनं मध्यमं विद्यते। आषाढमासे वपनम् अधमं कथ्यते। श्रावणमासे वपनम् अधमाधमं निगद्यते।

**उत्तरात्रयमूलेन्द्रमैत्रपेत्रेन्दुधातृषु।**

**हस्तामयमध रेवत्यां बीजवपनमुत्तमम्।।**[2]

अर्थात् उत्तराफाल्गुनी-उत्तराषाढ-उत्तराभाद्रपद-मूल-ज्येष्ठा-अनुराधा-मघा-मृगशिरा-रोहिणी-हस्त-रेवतीनक्षत्रेषु बीजवपनं शुभप्रदमुत्तमं च भवति। बीजवपने निषिद्धनक्षत्राणां विवेचनं प्रस्तूयते पराशर: यथा-

**विष्णुपूर्वाविशाखासु याम्यरौद्रानिलाहिषु।**

**बीजस्य वपनं कृत्वा बीजमाप्नोति मानव:।।**[3]

अर्थात् श्रवण-पूर्वाफाल्गुनी-पूर्वाषाढ-पूर्वाभाद्र-विशाखा-भरणी-आर्द्रा-स्वाती-अश्लेषानक्षत्रेषु बीजवपनात् कृषकान् बीजमाप्नोति, अर्थात् अधिकसस्यस्योत्पादनं न भवति। धान्यरोपणे बीजवपने च शुभाशुभवासरस्य प्रतिपादनं करोति पराशर: यथा-

**वपने रोपणे चैव वारयुग्मं विवर्जयेत्।**

**मूषिकाणां भयं भौमे मन्दे शलभकीटयो:।।**[4]

अर्थात् बीजवपने धान्यरोपणे च वासरद्वयं विहाय बीजवपनं करणीयम्। भौमवासरे यदि बीजस्य वपनं कुर्यात् तदा मूषिकाणां भयं भवति। यदि शनिवासरे बीजस्य वपनं कुर्यात् तदा पतङ्ग-कीटयोः भयं भवति। बीजवपने रोपणे च निषिद्धतिथीनां वर्णनं पराशरेण प्रोक्तं यथा -

**न वपयेत्तिथौ रिक्ते क्षीणे  सोमे विशेषतः।**

**एवं सम्यक् प्रयुञ्जानः सस्यवृद्धिमवाप्नुयात्।।**[5]

अर्थात् चतुर्थी-नवमी-चतुर्दशी-तिथीः विशेषरूपेण क्षीणे चन्द्रे सति बीजस्य वपनं न कुर्यात्। विहितकाले बीजवपनेन सस्यस्य वृद्धिः भवति। बीजवपने ज्येष्ठादिमासस्य विशेषदिवसानां त्याज्यस्य विषये पराशरेण प्रोक्तं यथा-

**ज्यैष्ठान्ते त्रिदिनं सार्द्धमाषाढादौ यथैव च।**

**वपनं सर्वसस्यानां फलार्थी कृषकस्त्येजेत्।।**[6]

अर्थात् फलस्य इच्छया: कृषकः सर्वेषामन्नानां वपनाय ज्यैष्ठमासस्य अन्तिमसार्द्धत्रयदिनानां तथा च आषाढमासस्य प्रारम्भिकसार्द्धदिनत्रयानाम् अर्थात् ज्येष्ठकृष्णपक्षस्य द्वादशीतिथेः उत्तरार्धात् आषाढशुक्लपक्षस्य चतुर्थीतिथेः पूर्वार्द्धयावत् उक्तदिवसानां बीजवपने त्यजेत्। बीजवपने रोपणे च भूमेः रजस्वला विचारः प्रस्तूयते पराशरः यथा-

**वृषान्ते मिथुनादौ च त्रीण्यहानि रजस्वला।**

**बीजं न वापतेत्तत्र जनः पापाद् विनश्यति।।**[7]

अर्थात् वृषान्ते अर्थात् ज्यैष्ठमासस्यान्ते मिथुनान्ते अर्थात् आषाढमासस्यान्ते च उभयोः मासयोः आरम्भस्य दिनत्रयं यावत् पृथ्वीरजस्वला भवति। अतः पृथ्वीरजस्वलाकाले बीजस्य वपनं नैव करणीयम्। उक्तदिवसेषु यदि बीजस्य वपनं क्रियते तदा मनुष्यः पापाद् विनश्यति। पराशरेण नक्षत्रवशात् रजस्वला लक्षणं प्रोक्तं यथा -

**मृगशिरसि निवृत्ते रौद्रपादेऽम्बुवाची।**

**भवति ऋतुमती क्ष्मा वर्जयेत्त्रीण्यहानि।।**

**यदि वपति कृषाणः क्षेत्रमासाद्य बीजं।**

**न भवति फलभागी दारुणश्चात्रकालः।।**[8]

अर्थात् मृगशिरानक्षत्रस्यान्ते सति आर्द्रानक्षत्रस्य प्रथमचतुर्थांशे यो कालः भवति सः कालः अम्बुवाचीकालः कथ्यते, अस्मिन् काले पृथ्वीऋतुमती भवति। अतः बीजवपनकर्मणि दिनत्रयं विहाय बीजवपनं करणीयम्। यदि कृषकः ऋतुमतीकाले बीजस्य वपनं करोति चेत् तदा केदारे स्थापितबीजं फलयुक्तः न भवति। ऋतुमतीकालं दारुणकालः वर्तते। बीजवपनस्य विधिः पराशरः कथयति यथा -

**हिमवारिनिषिक्तस्य बीजस्य तन्मनाः शुचिः।**

**इन्द्रं चित्ते समाधाय स्वयं मुष्टित्रयं वपेत्।।**[9]

अर्थात् कृषकः तन्मयतापूर्वकं पवित्रं भूत्वा चित्ते इन्द्रस्य ध्यानं कृत्वा शीतलजलेन सिक्त मुष्टित्रयं स्वयं वपेत्। प्रसन्नचितकृषकः धान्यस्य पुण्याहवाचनान्तरं प्राङ्मुखं कृत्वा हस्ते कलशं धारयित्वा मन्त्रं पठेत्। तत् मन्त्रं यथा -

**वसुन्धरे महाभागे बहुशस्यफलप्रदे।**

**देवराज्ञि नमोऽस्तु ते सुभगे सस्यकारिणी।**

**रोहन्तु सर्वसस्यानि काले देवः प्रवर्षतु।**

**सुस्था भवन्तु कृषका धनधायन्समृद्धिभिः।।**[10]

हे महाभागे ! बहुसस्यदायिनी देवराज्ञि कल्याणदात्री तथा अन्नोत्पन्नदायिनी वसुन्धरा ! तुभ्यं नमः सर्वेषां धान्यानां विहितकाले अङ्कुरणं भवेत्, विहितकाले मेघः वर्षेत्। एवञ्च धनधान्यसमृद्धिः भवेत्। कृषिनिर्विघ्नतायै घृतपायसैः कृषकान् भोजनं कुर्यात् अस्मिन् सन्दर्भे पराशरेण प्रोक्तं यथा -

**कृत्वा तु वपनं क्षेत्रे कृषकान् घृतपायसैः।**

**भोजयित्वा सुभोज्येन निर्विघ्ना जायते कृषिः।।**[11]

अर्थात् क्षेत्रे वपनं कृत्वा सुभोज्येन घृतपायसैः कृषकान् भोजयित्वा। एतादृशाः कार्यकरणेन कृषि निर्विघ्नतापूर्वकं पूर्णताम् याति। बीजवपनस्य विहितकालः मुहूर्तचिन्तामणौ रामदैवज्ञेनापि प्रतिपादितम् यथा –

**एतेषु श्रुतिवारुणदितिविशाखोडूनि भौमं विना**

**बीजोप्तिर्गदिता शुभा त्वगुभतोऽष्टाग्नीन्दुरामेन्दवः।**

**रामेन्दूग्नियुगान्यसच्छुभकराप्युप्तौ हलेऽकोज्झिताद्**

**भाद्रामाष्टनवाष्टभानि मुनिभिः प्रोक्तान्यसत्सत्ति च।।**[12]

भावोऽयं विद्यते यत् – हलप्रवहणे कथितनक्षत्रेषु तिथिवारेषु च तथा च श्रवण–शतभिषा–पुनर्वसु–विशाखा–नक्षत्रान् तथा भौमवारं विहाय भद्रातिथीम् विहाय अन्यतिथिषु बीजवपनमुत्तमम्। सन्दर्भेऽस्मिन् रत्नमालायामपि प्रोक्तं यथा –

**हस्ताश्विपुष्योत्तररोहिणीषु चित्रानुराधामृगदेवतीषु।**

**स्वातौ धनिष्ठासु मघासु मूले बीजोप्तिरुत्कृष्टकला।।**[13]

भावोऽयं वर्तते – हस्त–अश्विनी–पुष्य–उत्तराफाल्गुनि–उत्तराषाढ–उत्तराभाद्रपद–रोहिणी–चित्रा–अनुराधा–मृगशिरा–रेवती–स्वाती–धनिष्ठा–मघा–मूलनक्षत्रेषु बीजवपनमुत्कृष्टफलदायकं भवति।
सन्दर्भेऽस्मिन् नारेदनापि प्रोक्तं यथा –

**मृदुध्रुवक्षिप्रभेषु पित्त वायुवसूडुषु।**

**समूलेषु बीजोप्तिरत्युत्कृष्टफलप्रदा।।**[14]

भावोऽयं वर्तते – मृगशिरा–रेवती–चित्रा–अनुराधा–उत्तराफाल्गुनि–उत्तराषाढ–उत्तराभाद्रपद–रोहिणी–हस्त–अश्विनि–पुष्य–मघा–स्वाती–धनिष्ठानक्षत्रेषु समूलेषु बीजवपनं शुभकरं भवति। बीजवपने राहुचक्रस्य विवेचनमपि प्राप्यते यथा –

**राहुभादष्टमं यावद् द्वादशं षोडशं तथा।**


**विशं बिनाच्चतुष्कं च बीजवापे परित्येजेत्।।**

भावोऽयं वर्तते यत् राहु यस्मिन्नक्षत्रे स्यात् तत् नक्षत्रात् 8/3/1/3/1/3/1/3/4 नक्षत्रं क्रमात् अशुभं भवति शेषनक्षत्राणि बीजवपने शुभं भवति।
धान्यरोपणविधिसन्दर्भे पराशरः कथयति –

**वपनं रोपणं चैव बीजं स्यादुभयात्मकम्।**

**वपनं रोगनिर्मुक्तं रोपणं सगदं सदा।।**[15]

अर्थात् बीजं द्विविधं भवति वपनं रोपणं च वर्तते वपनं रोगनिर्मुक्तं भवति। रोपणं रोगसहितं भवति। चित्रमाध्यमेन यथा –




धान्यरोपणस्य विधिः उच्यते पराशरेण यथा –

**न वृक्षरूपं धान्यानां बीजाकर्षणमाचरेत्।**

**न फलन्ति दृढा सर्वे बीजा: केदारसंस्थिता:।।**[16]

अर्थात् वृक्षाणां रूपधारणं स्वीकृत्य धान्यानां आकर्षणं नैव करणीयम्। दृढा: सर्वे बीजा: क्षेत्रे संस्थिता: न फलन्ति। धान्यरोपणे मासानां विवेचनं करोति पराशर: -

**हस्तान्तरं कर्कटे च सिंहे हस्तार्द्धमेव च।**

**रोपणं सर्वसस्यानां कन्यायां चतुरंगुलम्।।**[17]

बीजवपनस्य विहितकाल: पराशरेम प्रोक्तं यत् बीजवपनस्य कृते वैशाखमासं सर्वोत्कृष्टं वर्तते तथा ज्येष्ठमासं मध्यमं विजानीयात् बीजवपनाय उत्तरात्रयं-मूल-ज्येष्ठा-अनुराधा-मघा-मृगशिरा-रोहिणी-हस्त-रेवती-विशाखानक्षत्राणि शुभानि कथितानि तथा च श्रवण-पूर्वाफाल्गुनि-पूर्वाषाढ-पूर्वाभाद्रपद-विशाखा-भरणी-आर्द्रा-स्वाती- अश्लेषा नक्षत्राणि अशुभानि कथितानि। बीजवपने शनिभौमवारयो: अशुभ: कथिता: तथा च रिक्ततिथिषु अपि अशुभ: कथिता। रजस्वला भूमौ बीजवपनेन अशुभं प्रतिपादिता। मुहूर्तचिन्ताणिकारेण - उत्तरात्रय-रोहिणी-मृगशिरा-रेवती-चित्रा-अनुराधा-हस्त-अश्विनी-पुष्य-श्रवण-शतभिषा-पुनर्वसु-विशाखा-नक्षत्रेषु बीजवपनं अशुभं प्रोक्तानि तथा च भौमवारमपि अशुभं कथित: भद्रातिथीषु अपि बीजवपनं अशुभं कथिता:। उभयो: मतयो: समीक्षणेन ज्ञायते यत् पराशरेण- एतानि नक्षत्राणि शुभानि कथितानि, तानि कानिचिद् नक्षत्राणि शुभानि रामदैवज्ञेन अशुभानि कथितानि। उभयो: मतयो: शुभाशुभ नक्षत्रेषु वैसाम्यं दरीदृश्यते। तिथीषु अपि वैसाम्यं वर्तते, शुभाशुभवासरे उभयो: मतयो: मैतक्यं दृश्यते। नारदेन सह पराशरस्य नक्षत्रेषु किञ्चित वैसाम्यं दृश्यते। तथा च मुहूर्त्तचिन्ताणिकारस्यापि नारदेन सह नक्षत्रेषु वैसाम्यं प्रतिभाति। रत्नमालाग्रन्थस्यापि पराशरेण सह नक्षत्रेषु वैसाम्यं दृश्यते। अत: बीजवपने पराशरस्य चिन्तनं सर्वोत्कृष्टं वर्तते।

**सन्दर्भग्रन्थसूची**

1. कृषिपाराशर:, कृषिखण्ड:, श्लोक - 88
2. कृषिपाराशर:, कृषिखण्ड:, श्लोक -90
3. कृषिपाराशर:, कृषिखण्ड:, श्लोक -91
4. कृषिपाराशर:, कृषिखण्ड:, श्लोक -92
5. कृषिपाराशर:, कृषिखण्ड:, श्लोक -93
6. कृषिपाराशर:, कृषिखण्ड:, श्लोक -94
7. कृषिपाराशर:, कृषिखण्ड:, श्लोक -95
8. कृषिपाराशर:, कृषिखण्ड:, श्लोक -96
9. कृषिपाराशर:, कृषिखण्ड:, श्लोक - 97-98
10. कृषिपाराशर:, कृषिखण्ड:, श्लोक -99-100
11. कृषिपाराशर:, कृषिखण्ड:, श्लोक -101
12. मुहूर्त्तचिन्तामणि:, नक्षत्रप्रकरणम्, श्लोक - 29
13. मुहूर्त्तचिन्तामणि:, नक्षत्रप्रकरणम्, श्लोक - 29, पीयूषधाराटीकायां उद्धृत रत्नमालाग्रन्थस्य वचनम्।
14. मुहूर्त्तचिन्तामणि:
15. कृषिपाराशर:, कृषिखण्ड:, श्लोक-103
16. कृषिपाराशर:, कृषिखण्ड:, श्लोक -104
17. कृषिपाराशर:, कृषिखण्ड:, श्लोक -105